श्रवस: तम: तस्य उशना: तस्य शितायु: तस्य रुक्मकवच: तस्य ज्यामघ: तस्य विदर्भ: तस्य क्रथ: तस्य कुन्ति: तस्य वृष्टि: तस्य निर्वृत्ति: तस्य दशार्ह: तस्य व्योम: तस्य जिमूत: तस्य विकृति: तस्य भीमरथ: तस्य मधुरथ: तस्य शकुनि: तस्य करन्ति: तस्य देवमत: तस्य देवक्षेत्र: तस्य मधु: तस्य कुरुवश: तस्य अनुरथ: तस्य पुरुहोत्र: तस्य अंशु: तस्य सत्वश्रुत: तस्य वृष्णि: देवावृध: अन्धक: महाभुज: इति चत्वार: पुत्रा:। तेषु वृष्णिज्येष्ठ: तस्य सुमित्र: तस्य अनमित्र: तस्य वृष्टि: तस्य चित्रक: तस्य विदूरथ: तस्य शूर: तस्य भजमान: तस्य शिनि: तस्य भोज: तस्य राधिक: तस्य देवमीढ़: तस्य शूरसेन: तस्य वसुदेव: तस्य पुत्त्रो भगवान् श्रीकृष्ण: ॥*॥) ययातिपुत्त्रस्य पूरोरतिविस्तीर्णो वंश उच्यते। पूरो: पुत्त्रो जनमेजय: तस्य प्रचिन्वान् तस्य प्रवीर: तस्य मनस्यु: तस्य चारुपद: तस्य सद्यु: तस्य बहुगव: तस्य संयाति: तस्य अहंयाति: तस्य रौद्राश्व: तस्य ऋचेयु: तस्य रन्तिनार: तस्य सुमति: (तंसु:) तस्य रैभ्य: (सुरोध:) तस्य दुष्मन्तश्चक्रवर्त्ती। तस्य शकुन्तलायां भार्य्यायां भरतश्चक्रवर्त्ती आसीत्। यस्त्रयस्त्रिंशच्छतमश्वमेधान् कृतवान् पञ्चाशद्राजसूयान् एवमन्यान् नानाविधान् यज्ञान् अकरोत् बहूनि धनरत्नादीनि दत्तवान् सप्तविंशतिसहस्रवत्सरान् एकच्छत्रं राज्यं कृतवान्। तस्य पुत्त्रो वितथ: तस्य मन्यु: तस्य बृहत्क्षेत्र: तस्य हस्ती येन हस्तिनापुरं निर्म्मितम्। तस्य अजमीढ़: तस्य ऋक्ष: तस्य संवरण: तस्य सूर्य्यकन्यायां तपत्यां कुरु: तस्य जह्नु: तस्य सुरथ: तस्य विदूरथ: तस्य सार्व्वभौम: तस्य जयत्सेन: तस्य राधिक: तस्य अयुतायु: तस्य ऋक्ष: तस्य दिलीप: तस्य प्रतीप: तस्य देवापि: शान्तनु: वाह्लीक इति त्रय: पुत्त्रा:। तत्र देवापि: कलापग्रामे योगी भूत्वा वर्त्तते। स कलौ चन्द्रवंशे लुप्ते कलेरन्ते पुन: सत्ययुगे चन्द्रवंशं भावयिष्यति ॥*॥ तत्र शान्तनू राजा अभवत् स चक्रवर्त्ती तस्य गङ्गायां भीष्म: पुत्त्रो जात: स परमधर्म्मात्मा महावीर: येन पितुर्दाशकन्याविवाहार्थं पितृराज्यं त्यक्तम् य: स्वस्य विवाहं त्यक्त्वा ऊर्द्ध्वरेता जात:। शान्तनोर्दाशकन्यायां द्वौ पुत्त्रौ जातौ चित्राङ्गदो विचित्रवीर्य्यश्च। सत्यवत्यां कन्याकाले पराशरात् व्यासो जात:। पुनर्मुनेर्वरात् व्यासजन्मानन्तरं सा कन्यारूपाभवत्। चित्राङ्गदो युद्धे गन्धर्व्वेण हत:। विचित्रवीर्य्यस्य क्षेत्रे सत्यवत्याज्ञया व्यास: धृतराष्ट्रं पाण्डुञ्च जनयामास। धृतराष्ट्रस्यान्धस्य गान्धार्य्यां भार्य्यायां दुर्य्योधनज्येष्ठं पुत्त्रशतं बभूव। पाण्डोर्द्वे भार्य्ये कुन्ती माद्री च। मृगीभूतस्य मुने: शापान्मैथुनरहितस्य पाण्डोराज्ञया कुन्ती धर्म्माद् युधिष्ठिरं पवनाद्भीमं इन्द्रादर्ज्जुनं जनयामास। माद्री अश्विनीकुमाराभ्यां नकुलसहदेवौ जनयामास। युधिष्ठिरस्तु राजसूययाजी। अर्ज्जुनस्य सुभद्रायां भार्य्यायां अभिमन्युस्तस्य उत्तरायां भार्य्यायां परिक्षित्। युधिष्ठिरादनन्तरं कलियुगस्यारम्भे स राजासीत् चक्रवर्त्ती। तस्य जनमेजय: तस्य शतानीक: तस्य सहस्रानीक: तस्य अश्वमेधज: तस्य असीमकृष्ण: तस्य नेमिचक्र: स हस्तिनानगरे गङ्गाहृते कौशाम्ब्यां पुर्य्यां राजासीत्। तस्य उक्त: तस्य चित्ररथ: तस्य शुचिरथ: तस्य वृष्टिमान् तस्य सुषेण: तस्य सुनीथ: तस्य नृचक्षु: तस्य सुखीनल: तस्य परिप्लव: तस्य सुनय: तस्य मेधावी तस्य नृपञ्जय: तस्य दूर्व्व: तस्य तिमि: तस्य बृहद्रथ: तस्य सुदास: तस्य शतानीक: तस्य दुर्द्दमन: तस्य महीनर: तस्य दण्डपाणि: तस्य निमि: तस्य क्षेमक:। एतत्पर्य्यन्तमस्य वंशस्य शान्ति: एते कले: सहस्रवर्षपर्य्यन्तं स्थिता: ॥*॥ सोमवंशशाखान्तरे मगधवंश्या राजान: कलौ बहुकालं स्थिता:। अतस्ते वर्ण्यन्ते। तत्र युधिष्ठिरसमकालीनो जरासन्धसुत: सहदेवो मगधेषु राजासीत्। तस्य मार्जारि: तस्य श्रुतश्रवा: तस्य अयुतायु: तस्य निरमित्र: तस्य सुनक्षत्र: तस्य बृहत्सेन: तस्य कर्म्मजित् तस्य श्रुतञ्जय: तस्य विप्र: तस्य शुचि: तस्य क्षेम: तस्य सुव्रत: तस्य धर्म्मसूत्र: तस्य सम: तस्य दृढ़सेन: तस्य सुमति: तस्य सुबल: तस्य सुनीथ: तस्य सत्यजित् तस्य विश्वजित् तस्य पुरञ्जय: एते राजान: कले: सहस्रवत्सरपर्य्यन्तं राज्यं कृतवन्त: ॥*॥ तत: पुरञ्जयस्य मन्त्री शुनक: पुरञ्जयं हत्वा तस्य पुत्त्रं प्रद्योतं राजानं कृतवान्। तदारभ्य राजानो वर्णसङ्करदोषदुष्टा जाता:। प्रद्योतपुत्त्र: पालक: तस्य विशाखयूप: तस्य राजक: तस्य नन्दिवर्द्धन:। एते पञ्च अष्टत्रिंशोत्तरशतवर्षं भूमिपा आसन् ॥*॥ नन्दिवर्द्धनस्य पुत्त्र: शिशुनाग: तस्य काकवर्ण: तस्य क्षेमधर्म्मा तस्य क्षेत्रज्ञ: तस्य विधिसार: तस्य अजातशत्रु: तस्य दर्भक: तस्य अजय: तस्य नन्दिवर्द्धन: तस्य महानन्दि: एते दश नृपा: षष्ठ्युत्तरशतत्रयं वत्सरान् भूमिपाला आसन् ॥*॥ महानन्दिसुतो नन्द: शूद्रायां समुत्पन्न: राजासीत् तस्य सुमाल्याद्या अष्टौ पुत्त्रा आसन्। ते शतवत्सरान् राज्यं कृतवन्त:। चाणक्यनामा कश्चिद्ब्राह्मण: नन्दं तत्पुत्त्रांश्च हत्वा मौर्य्यं चन्द्रगुप्तं राजानं कृतवान्। कलौ नन्दान्त: क्षत्त्रियवंश:। इति श्रीभागवतं महाभारतञ्च ॥

चन्द्रवल्लरी, स्त्री, (चदि आह्लादे + रक्। चन्द्रा आनन्ददायिका वल्लरी। सुधातुल्यमधुराविततथात्वम्। चन्द्रस्य वल्लरी लता इति केचित्।) सोमवल्लरी। सोमलता इति ख्याता। ब्राह्मीशाकमिति केचित्। इत्यमरटीकायां भरत: ॥

चन्द्रवल्ली, स्त्री, (चन्द्र इव आनन्ददायिका वल्ली।) प्रसारणी। माधवीलता। इति राजनिर्घण्ट: ॥ सोमलता च ॥ (सोमलताशब्दे गुणादयोऽस्या ज्ञेया: ॥)

चन्द्रवाला, स्त्री, (चन्द्रं कर्पूरमपि वलते संवृणोति स्वगन्धेन इति। वल संवरणे + अण्। ततष्टाप्।) स्थूलैला। इत्यमर:। २। ४। १२५ ॥ (पर्य्यायोऽस्या यथा,—

"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च।
भद्रैला बृहदेला च चन्द्रवाला च निष्कुटि: ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

चन्द्रविहङ्गम:, पुं, (चन्द्र इव शुभ्रो विहङ्गम:।) बकपक्षी। इति त्रिकाण्डशेष: ॥

चन्द्रव्रतं, क्ली, (चन्द्राय चन्द्रलोकप्राप्तये यत् व्रतम्। यद्वा, चन्द्रस्य ह्रासवृद्धिभ्यां कृतं यद्व्रतं तत्।) चान्द्रायणम्। इति स्मृति: ॥ (एतद्विवरणं चान्द्रायणशब्दे द्रष्टव्यम् ॥)

चन्द्रशाला, स्त्री, (चन्द्रेण शालते शोभते इति। शाल + अच्। ततष्टाप्।) ज्योत्स्ना। इति त्रिकाण्डशेष: ॥ (चन्द्र इव शालते श्लाघते इति। उच्चस्थानस्थितत्वादेव तथात्वम्।) प्रासादोपरिगृहम्। तत्पर्य्याय:। शिरोगृहम् २। इति हेमचन्द्र:। ४। ६१ ॥ चन्द्रशालिका ३ वड़भी ४ कूटागारम् ५। इति त्रिकाण्डशेष: ॥ (यथा, रघु:। १३। ४०।

"तस्यायमन्तर्हितसौधभाज:
प्रसक्तसङ्गीतमृदङ्गघोष:।
वियद्गत: पुष्पकचन्द्रशाला:
क्षणं प्रतिश्रुन्मुखरा: करोति ॥")

चन्द्रशालिका, स्त्री, (चन्द्र इव शालते इति। शाल + ण्वुल्। टापि अत इत्वम्। यद्वा, चन्द्रशाला + स्वार्थे कन्।) वड़भी। इति त्रिकाण्डशेष: ॥

चन्द्रशूरं, क्ली, फलविशेष:। हालिम् इति भाषा। तत्पर्य्याय:। चन्द्रिका २ चर्म्महन्त्री ३ पशुमेहनकारिका ४ नन्दनी ५ कारवी ६ भद्रा ७। अस्य गुणा:। हिक्कावातश्लेष्मातिसारिणां हितत्वम्। असृग्वातरोगद्वेषित्वम्। बलपुष्टिविवर्द्धनत्वञ्च। इति भावप्रकाश: ॥

चन्द्रशेखर:, पुं, (चन्द्र: शेखरे मौलौ यस्य। यद्वा, चदि आह्लादे + रक्। चन्द्र: आह्लाद: आनन्दानुभवरूपपरमात्मज्योति: शेखरे ललाटोर्द्ध्वभागे यस्य। स्वप्रकाशात्मनां शरीरत्रयोपाधिवर्ज्जितानां योगीन्द्रपुरुषाणामपि ललाटदेशे सत्यज्ञानानन्दात्मतसेतो: परब्रह्मण: स्वाभाद्रुज्योतिर्म्मण्डलस्य प्रकाशमानत्वात् अन्येष्वपि चन्द्रशेखरत्वमिति चेन्न। विश्वगुरोर्महादेवादन्यत्र पूर्णतमयोगसिद्धेरप्रसिद्धे:। किञ्च महेश्वरादिशब्दवत् रूढ़िशक्तितोऽपि सर्व्वयोगीन्द्रगुरौ भगवति महेश्वरे एव चन्द्रशेखरपदस्य समन्वयेतेति पूर्व्वाचार्य्यपादा: ॥) शिव:। इत्यमर: ।१।१।३२ ॥ (यथा, कुमारे। ५। ५८।

"यदा बुधै: सर्व्वगतस्त्वमुच्यसे
न वेत्सि भावस्थमिमं कथं जनम्।